हते देवाय त्र्यम्बकायैकचरायाधिपतये हराय शर्वायेशानायोग्राय वज्रिणे घृणिने कपर्दिने नमः। सूर्यायादित्याय नमः। नीलग्रीवाय शितिकण्ठाय नमः। कृष्णायापिङ्गलाय नमः। ज्येष्ठाय श्रेष्ठाय वृद्धायेन्द्राय हरिकेशायोर्द्ध्वरेतसे नमः। सत्याय पावकाय पावकवर्णाय कामाय कामरूपिणे नमः। दीप्ताय दीप्तरूपिणे नमः। तीक्ष्णाय तीक्ष्णरूपिणे नमः। सौम्याय सुपुरुषाय महापुरुषाय मध्यमपुरुषायोत्तमपुरुषाय ब्रह्मचारिणे नमः। चन्द्रललाटाय कृत्तिवाससे नमः इति एतदेवादित्योपस्थानमेता एवाज्याहुतयो द्वादशरात्रस्यान्ते चरुं श्रपयित्वैताभ्यो देवताभ्यो जुहुयादग्नये स्वाहा। सोमाय स्वाहा। अग्नीषोमाभ्यामिन्द्राय विश्वेभ्यो देवेभ्यो ब्रह्मणे प्रजापतयेऽग्नये स्विष्टकृत इति। अन्ते ब्राह्मणभोजनमिति"। तत्र "तिष्ठेदहनि रात्रावासीत क्षिप्रकामः" इत्यस्यायमर्थः यस्तु महतोऽप्येनसः क्षिप्रमेकेनैव कृच्छ्रेण मुच्येयमित्येवं कामयते असावहनि कर्माविरुद्धेषु कालेषु तिष्ठेद्रात्रावासीत। एवं रौरवयौधाजपसामजपौ नमो हनायेत्यादिभिस्तर्पणादित्योपस्थानादिकञ्चरुश्रपणादिकञ्च योगीश्वराद्यनुक्तं क्षिप्रकामः कुर्वीत। अतश्च योगीश्वराद्युक्तप्राजापत्यद्वयस्थाने गौतमीयमनेकेतिकर्त्तव्यतासहितन्द्रष्टव्यम्। एवमन्यत्रान्यत्रापि च स्मृत्यन्तरतो विशेषान्तराण्यन्वेषणीयानि। अतिकृच्छ्रमाह "अयमेवातिकृच्छ्रः स्यात्पाणिपूरान्नभोजनः" या०। एतद्धर्मक एव एकभक्तादिप्राजापत्यधर्मयुक्तोऽतिकृच्छ्रः स्यात्। इयांस्तु विशेषः आद्ये त्र्यहत्रये पाणिपूरणमात्रमन्नं भुञ्जीत न पुनर्द्वाविंशतिग्रासान्। अत्र च ग्रासभोजनानुवादेन पाणिपूरान्नभोजनविधानादन्त्यत्र्यहेऽतिदेशप्राप्त उपवासोऽप्रतिपन्न एव। अत्रापि पादशो व्यवस्थापूर्ववदेव द्रष्टव्या। यत्तु मनुनोक्तम् "एकैकं ग्रासमश्नीयात्त्र्यहाणि त्रीणि पूर्ववत्। त्र्यहं चोपवसेदन्त्यमतिकृच्छ्रं चरन् द्विजः" इति तत्पाणिपूरणपरिमितादल्पत्वाच्छक्तविषयम्। कृच्छ्रातिकृच्छ्रमाह "कृच्छ्रातिकृच्छ्रः पयसा दिवसानेकविंशतिम्" या० एकविंशतिरात्रं पयसा वर्त्तनं कृच्छ्रातिकृच्छ्राख्यं व्रतं विज्ञेयम्। गौतमेन तु द्वादशरात्रमुदकेन वर्त्तनं कृच्छ्रातिकृच्छ्र उक्तः "अब्भक्षस्तृतीयः स कृच्छ्रातिकृच्छ्र" इति। अतश्च शक्त्यपेक्षयाऽनयोर्व्यवस्था। पराकमाह "द्वादशाहोपवासेन पराकः परिकीर्त्तितः" या० ऋज्वर्थोऽयमर्द्धश्लोकः। सौम्यकृच्छ्रमाह "पिण्याकाचामतक्राम्बुसक्तूनां प्रतिवासरम्। एकरात्रोपवासश्च कृच्छ्रः सौम्योऽयमुच्यते"। पिण्याको निःसृततैलस्तिलस्तस्यौदननिस्रावोदश्विदुदकसक्तूनाञ्च पञ्चानामेकैकं प्रतिदिवसमुपभुज्य षष्ठेऽह्नि उपवसेदेवं सौम्याख्यः कृच्छ्रोऽभिधीयते। द्रव्यपरिमाणन्तु प्राणयात्रामात्रनिबन्धनमधिगन्तव्यम्। जाबालेन चतुरहव्यापी सौम्यकृच्छ्र उक्तः "पिण्याकं सक्तवस्तक्रञ्चतुर्थेऽहन्यभोजनम्। वासो वै दक्षिणां दद्यात्सौम्योऽयं कृच्छ्र उच्यत" इति। तुलापुरुषाख्यं कृच्छ्रमाह "एषान्त्रिरात्रमभ्यासादेकैकस्य यथाविधि। तुलापुरुष इत्येष ज्ञेयः पाञ्चदशाह्निकः" या० "एषां पिण्याकादीनाम्पञ्चानां क्रमेणैकैकस्य त्रिरात्राभ्यासेन पञ्चदशाहव्यापी तुलापुरुषाख्यः कृच्छ्रो वेदितव्यः। अत्र पाञ्चदशाह्निकत्वविधानादुपवासस्य निवृत्तिः। यमेन त्वेकविंशतिरात्रिकस्तुलापुरुष उक्तः "आचाममथ पिण्याकं तक्रञ्चोदकसक्तुकान्। त्र्यहन्त्र्यहम्प्रयुञ्जानो वायुभक्षस्त्र्यहद्वयम्। एकविंशतिरात्रस्तु तुलापुरुष उच्यते" इति। अत्र हारीताद्युक्तेतिकर्त्तव्यता ग्रन्थगौरवभयान्न लिख्यते" मिता०। चान्द्रायणकृच्छ्रस्तु चान्द्रायणशब्दे वक्ष्यते। २कष्टे दुःखे "अमन्त्रयत कृच्छ्रेषु तस्याः सर्वः सभाजनः" रामा०। "महत् खलु कृच्छ्रमनुभूतं तत्रभवत्या" मालवा०। ३कष्टसाधने ४कष्टयुक्ते च त्रि० अमरः "इत्यञ्च देशाननुसञ्चराम: वनानि कृच्छ्राणि च कृच्छ्ररूपाः" भा० व० ३४ अ०। "कृच्छ्रां प्राप स आपदम्" रामा०। ५कष्टसाध्ये त्रि० "अमन्त्रयित्वा सचिवैः योऽर्थं कृच्छ्रं न्यपसरेत्" रामा०। "अतोऽन्यथा त्वसाध्यः स्यात् कृच्छ्रोऽयं मिश्रलक्षणः" सुश्रु०। ६प्रजापत्यव्रते "विप्रदण्डोद्यमे कृच्छ्रमतिकृच्छ्रं निपातने" मनुः। "तांश्चारयित्वा त्रीन् कृच्छ्रान् यथाविध्युपनाययेत्" मनुः। "एकवर्षे गवि हते कृच्छ्रपादो विधीयते। अबुद्धिपूर्वं पुंसः स्याद्द्विपादस्तु द्विहायने। त्रिहायणे त्रिपादस्तु प्राजापत्यमतः परम्" प्रा०त० वृद्धप्रचेताः। "चतुर्हायणादौ प्राजापत्यविधानात् कृच्छ्रपदं प्राजापत्यपरम्" प्रा० त० रघु०। ७पापे न० मेदि० ८मूत्रकृच्छ्ररोगे पु० राजनि० कृच्छ्रं वेदयते सुखा० क्यङ् पापचिकीर्षायाम्। कृच्छ्रायते पापं चिकीर्षति। सुखा० अस्त्यर्थे वा मतुप् मस्य वः। कृच्छ्रवत् पक्षे इनि। कृच्छ्रिन् तद्युक्ते त्रि० "सह कृच्छ्री बभूव" का० उ०। स्त्रियां ङीप्। असत्यपरत्वे-